संगीतरघुनंदन

नं. १८५६

6122

F-70

60 rs missing

नं. ६ बहिरितमपत्रंनास्ति



संत॰ ॐश्रीगणेशायनमः श्रीसीतारामचन्द्रायनमः वंदेतत्पदकमलंयस्यमरंदःपुनातिजग
टी॰ दखिलम् उपलंरागलेशश्चेतनतांशीघ्रमानयति १ राजेन्द्रनंदनविलोचनचंचरीकसंसेव्य
१ मानवदनाम्बुरुहास्यवीचिभिः स्वीयप्रभाजितरमारुचिभिःपरीतंरामेश्वरीहृदिभजेनि
मिराजपुत्रीम् २ अशेषाज्ञानतिमिरविध्वंसनदिवाकरम् श्रीरामरामरसिकंजगत्त्राण
रतंनुमः ३ शारदाम्भोजवदनांशारदेन्दीवरेक्षणाम् नमामिशारदांदेवींशारदेन्दु
करप्रभाम् ४ सिंदूरपूरारुणगंडलाधरकलाधरम् संध्याम्बरमिवावन्देगानेश्वरम
हम्बपुः ५ सीतारामर``स्यंमांबोधयंतिहृदम्बुजे स्थिताप्तान्हरिरूपान्श्रीप्रियादास
गुरून्भजे ६ नत्वागौरीशपादाब्जंटीकाकाव्यस्यार्थचन्द्रिका श्रीरामरामरसिकविनोदा
यविधीयते ७ अस्यचाव्यग्रंथस्यपरमोत्तमत्वम् यद्यपिकाव्यप्रकाशेउत्तममध्यमाध
मभेदात्काव्यस्यत्रैविध्यमेवोक्तंतथाहि इदमुत्तममतिशयिनिव्यंग्येवाच्याद्ध्वनिर्बुधैःक
थितः अतादृशिगुणीभूतव्यंग्यंव्यंग्येतुमध्यमम् शब्दचित्रंवाच्यचित्रमव्यंग्यंत्ववरंस्मृ
तमिति तदुदाहरणानिच निःशेषच्युतचंदनंस्तनतटं निर्मृष्टरागोऽधरो नेत्रेदूरमनं
जनेपुलकितातन्वीतवेयंतनुः मिथ्यावादिनिदूतिबांधवजनस्याज्ञातपीडागमे वा १

पीस्तात्प्रमितोगतास्तिनष्टनस्तस्यायमस्यान्तिकम् १ ग्रामतरुणेन तरुणयानवञ्जुलमंजा
रीसनाथकरम् पश्यंत्याभवतिमुहुर्नितरांमलिनामुखच्छाया २ स्वच्छन्दोच्छलदच्छ
कच्छकुहरच्छातेतराम्बुच्छटामूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नायवः भिद्यादु
द्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुममद्रोहोद्रेकमहोर्मिमेदुरमदामंदाकिनीमंदताम् विनिर्ग
तंमानदमात्ममंदिराद्भवत्युपश्रुत्ययदृच्छयापियम् ससंभ्रमेन्द्रद्रुतपातितार्गलानिमी
लिताक्षीवभियामरावती ४ तथाप्यत्रप्रतिश्लोकेध्वनिभिर्ध्वनीनामुद्भवात्परमोत्तमत्व
मित्यलम् तदुक्तमलंकारकौस्तुभे ध्वनेर्ध्वन्यंतरोद्गारेतदेवखलूत्तमोत्तममिति अथच
मल्लिनाथरामायणादिभाषाग्रंथेषुसर्वसिद्धान्तादिसंस्कृतग्रंथेषुच यद्यपिमयाव्यंग्यार्थोभा
वप्रकाशितस्तथानभ्यसनेऽ तदिदंसंगीतरघुनंदनेनामस्वल्पंग्रंथमवगत्यग्रंथविस्तरभ
याल्लंकारादिविवेचनमपहायसंक्षेपतोगूढमगूढमितिद्विविधंव्यंग्यभावंचदर्शय
न्नर्थमात्रंकरोमि अनयैवरीत्याऽन्येष्वपिग्रंथेषुव्यंग्यादिसद्भिर्विलोकनीयम् नत्वकयो
स्वमुखेनस्वकृतेग्रंथेप्रशंसायुक्तेतिचेच्छृणुमदस्यममकथमीदृशग्रंथकरणसामर्थ्यंर
घुनंदनएवमदंतः प्रविश्यनिजंचरितमुच्चारितवानतस्तत्कृतस्यग्रंथस्यप्रशंसाकृता॥

नन्वस्य ग्रंथस्य रघुनाथस्य प्रणीतत्वेन तत्र तत्र विश्वनाथकृतत्वोत्कीर्तनविरोधस्तस्याविघ्नशंकाभावान्मङ्गलाचर
णाः संगच्छेतेति चेन्न मत्कर्त्तृकत्वेन मत्कृतत्वोत्कीर्तनसंगतेः मत्कर्त्तृकत्वे निर्विघ्नत्वाय शिष्टाचारप्रद
र्शनाय च मङ्गलाचरणोपपत्तेश्च अथ ग्रंथस्य प्रकटनं चिकीर्षुर्मंगलाचरति रामप्रेमेति रामस्य प्रेमैव पयो
धिः समुद्रस्तस्य वर्द्धने विधुश्चन्द्रः शृंगारस्य यः सारस्तस्यास्पदं निवासस्थानम् संसार एवार्णवः समुद्र
स्तस्मात्तारस्य तारणे तरिर्नौका मायैव तमोन्धकारस्तस्य दीपिका यथा दीपिका प्रसिद्धमन्धकारं नाशय
ति तथेयं मायामायेनाशयतीत्यर्थः विघ्ना एवाभ्राण्यस्याः सान्द्रखण्डस्य वर्षणकरी मङ्गलके जनिवासि

श्रीजानकीवल्लभाय नमः । रामप्रेमपयोधिवर्द्धनविधुः शृंगारसारास्पदं संसारार्णवदु
स्तारतारणतरिर्मायातमोदीपिका विघ्नाभ्रखण्डदववर्षणकरी कादंबिनी काप्यसौ मङ्गलके

नीम मम हृदयकमले निवसनशीला कापि प्रसिद्ध जनिवासिनी विजयतां श्रीजानकी सर्वदा १
कादंबिनीति विलक्षणा कादंबिनी मेघमाला एवंभूता असौ श्रीजानकी सर्वदा विजयतां निजोत्कर्षं
प्रकटयत्वित्यर्थः अत्र मङ्गलके जनिवासिनीति पदेन मद्धृदये निवसत्यनङ्गणविशिष्टा श्रीजानकी म
द्धृदयोद्भूतं काव्यमप्येतद्गुणविशिष्टं करोत्विति व्यज्यते तेन चैतद्ग्रंथस्य परमोत्तमत्वम् अत्र च रूपो
द्व्यं वैशिष्ट्यजन्यपदप्रधानार्थशङ्कानुद्भववत्तेनावस्काथनिः अत्र वक्ता कविस्तत्र वैशिष्ट्यं च सीताग
मरासविषयकप्रेमरूपं प्रमाणान्तरवेद्यं तत्तस्मात्तया च कविना बाहुल्याप्रतिपादनीया श्रीजानकी
न च प्रमाणान्तरवेद्यमभीष्टदातृत्वरूपं वैशिष्ट्यं तस्मात् ज्ञानवतां श्लोकोपात्तस्यार्थस्य मम काव्य

कीर्त्याःकीर्तिरिति कीर्त्याःलीलादेव्याअपिकीर्तिःलीलादेवीतयाभुवः भूदेव्याअपिभूःभूदेवी
तयाश्रियः श्रीदेव्याअपिउत्तमाश्रीः श्रीदेवी तयाचवाल्मीकीये श्रियः श्रीश्चभवेदग्र्याकीर्त्याःकी
र्तिः क्षमाक्षमेति तयाह्लादिन्यादयोयाः स्वशक्तयस्तन्यशक्तयस्ताभिः सेवितेपदचरणोयस्याःसा
मायाह्लादिर्यासांनामायादिकाःजडशक्तयस्तासांस्वामिनीप्रवर्तनकर्त्रीसर्वेषामपिकामदोरघु
पतिःश्रीरामचंद्रस्तस्यापिसर्वकामप्रदस्यापियाकामदाकामदात्रीसारासीश्वरीसीतामदीय
भणितिंचारुतांमाधुर्यादिगुणसंपन्नतांप्रापयतु अत्रसीतापदस्यायमर्थः साचलक्ष्मीः प्र
कीर्तिमा अकारोवासुदेवः स्याल्लकारस्तुपितामहः ऐकारःस्यान्महेश्वरइतिएकाक्षरकोशात्

कीर्त्याःकीर्तिरयोभुवोऽपिचतथाभूःश्रीःश्रियश्चाक्षमाह्लादिन्यादिमशक्तिसेवित
पदामायादिकस्वामिनी सर्वेषामपिकामदोरघुपतिस्तस्यापियाकामदासासीतात
नुतांमदीयभणितिंसेश्वरीचारुताम् २

साचअश्चअश्वश्चईश्वरोस्वपदेभ्यःसमाहारःसिःलक्ष्मीवासुदेवपितामहमहेश्वरम्तदिताग्रेतर्ष्यामितया
श्रासमीनेतिसीतापदस्येदंवैगयम् सर्वांतर्यामित्वविस्तारध्यन्तयामितयासर्वांतर्यामित्वमिति
तेनचहृदिमांप्रेरयित्वेमंग्रंथप्रादुर्भावयत्विति अन्य अत्रवक्तृवैशिष्ट्यजन्यपदप्रधानशाब्दशक्तु
वचस्तनोप्रार्थनारूपवस्तुध्वनिः अत्रकीर्त्याःकीर्तिरित्यादिविशेषणैःस्तवेस्यैरितमम्बुखप्रक
टितकाव्यमपिकीर्तिकरंतत्तथाभूप्रदंतथावर्ण्यप्रदंतयानिहितकारितयाकामप्रदंकरोत्विय
तिव्यज्यते तेनचअंथस्यजगदुपकारकत्वमिति रासेश्वरीतिपदेनचमदीयहृदयेरासप्रक

सं॰त॰
टी॰
३

3

श्रीरामचरितवर्णनेमस्त्वंविघ्नविनाशनंहनूमंतंप्रार्थयति सर्वक्लेशेति सर्वेयेक्लेशाः ग्रयवास
वैयेक्लेशाः एवमृणालानिकमलमूलानितेषांपाटनेउन्मूलनेपटुः प्रवीणः बलीमते भराजः मत्त
गजराजः सीतारामयोर्योवियोगः सएववह्निः तस्यशमनः शान्तिकर्त्तासावर्त्तकः प्रलयकालिकः वा
रिदोमेघः सौमित्रिलक्ष्मणस्तस्यततेरावणप्रहृतशक्तिजनितेतदेवराजरोगः राजयक्ष्मातस्यदमनः
वैद्यधन्वंतरिः एवंभूतः नाम्नाश्रीहनुमानहनूर्विद्यतेयस्यसहनुमानत्रप्राशस्त्यार्थेमतुप्टहनुरि
स्यर्थः स्मरराशरसरसिकः सदैवरामस्यरसिकः सर्वतोमारक्षतान् ग्रत्रसकलक्लेशानाहनुमत्तमत्तामथ्यो
पेतथाकमलमूलवत्कोमलत्वंव्यज्यतेतेनचतन्नाशनेहनुमतोऽस्यनायासेनेति मृणालोमूलनेचवीः
पिजीवाः समर्थाभवंतितत्रगजराजः सोऽपिमत्तः सपुनर्बलवान्समर्थोभवतीति किमुवक्तव्यमि।
सर्वक्लेशमृणालपाटनपटुर्मत्तेनराजोवलीसीतारामवियोगवह्निशमनः सांवर्त्तकोवारिदः।
सौमित्रीहतराजरोगदमनोधन्वंतरिर्वैद्यराट् नाम्नाश्रीहनुमान्सरामरसिकोमासर्वतोरक्षतु
तिभावः किंचगजोयावन्मात्रस्यलेकरेणग्रामोहितावन्मात्रस्यैवमृणालान्युन्मूलयतित्वसकल
तज्ञागस्य भवांस्तुयदात्वंमदासकलसंसारस्यक्लेशान्युगपदेवनिर्मूलयेरितिपटुताविशिष्टावि
लक्षणगजरूपकतयाव्यज्यते यतोभवानस्मत्स्वामिनोः सीतारामयोर्वियोगवह्निशमितवानतस्त
न्मासस्यममापितयोः साक्षाद्दर्शनरूपवियोगशमयेतिसीतारामेत्यादिवाक्येनव्यज्यते प्रशक्ति
विद्धलक्ष्मणारक्षणात्श्रीरामस्त्वयिपरमप्रसन्नोऽभूत्तस्मात्तस्यैवदासोऽहमेपिसुदयलव्यपा
त्वान्नरूपशत्रुपामोहितस्तादृशीकुर्य्याश्चेन्नहिपुनरूपकारेणश्रीरामस्त्वय्यपिप्रसन्नोभविष्यतीति
सौमित्रेत्यादिनाव्यज्यते हनुमानित्यनेनवीरोकपञ्जः तेनचस्वामिनोवीर्यादास्तीतिव्यज्यते ३

३

ग्रथवागधिष्ठात्रीत्वात्सरस्वतीं प्रार्थयति वीणापुस्तकेति वीणापुस्तके हस्तयोर्यस्याः सा मस्तके विधुर्यस्याः सा वीणा
पुस्तकहस्ता चासौ मस्तकविधुश्चेति कर्मधारयः शुक्लाब्जं श्वेतपुण्डरीकं आसनं यस्याः सा चेदं ऽस्य उल्लासः प्रका
शः तस्येव विलासो यस्य स चासौ हासश्च वदने यस्याः सा विद्वज्ज्ञैर्वेदिता शास्त्रैर्न्यायादिभिः अस्त्रैरङ्गादिरूपैः
समस्तैर्गायत्र्यादिमंत्ररूपैः प्रणवादिबीजरूपैर्वेदैश्च वेदः प्रणव एवाग्र इति भागवतोक्तेः विदिता ज्ञाता तत्त्व
स्वरूपिणीत्यर्थः विध्वस्ता विनाशिता विश्वस्य जगतो जडता यया सा एवंभूता वागीश्वरी वाचामीश्वरी सरस्व
ती दन्तोद्दामामहत्तीर्थीर्द्विदियेस्मिन्कर्मणे वै मामकीनवदने मम मुखे व वर्वर्त्तु अतिशयेन वर्त्तताम् वीणापुस्तकह
स्तेत्यनेन गानेकाव्यादिसकलशास्त्रेषु प्रवीणता तेन च ममाऽपि काव्यमधुरता पादसाधुता सालंकारता सर

वीणापु॰॰ कहस्तकविधुः शुक्लाब्जन्यासना चन्द्रोल्लासविलासहासवदना विद्वज्ज्ञैर्वेदिता
शास्त्रास्त्रसमस्तवेदविदिता विध्वस्तविश्वाजना दन्तोद्दामधिमामकीनवदने वर्वर्त्तु वागीश्व

सतासंपत्रकरोतिति व्यज्यते मस्तकविधुरेति कमलासनेति विशेषणद्वयेन आल्हादकत्वं तापनिवर्त
कत्वं च यथा त्वय्यस्ति तथा मदीये काव्येपि ते करोतीति प्रार्थना व्यज्यते हासवदनेति विशेषणेन तस्याः सदाप्र
सन्नता व्यंजिता तयाचयः प्रसन्नो भवति स प्रार्थनमात्रेणैव मनोरथं पूरयतीति व्यज्यते विद्वज्ज्ञैर्वेदितेति
विशेषणेन विद्वांसस्त्वत्प्रसादेनैव पाण्डित्यं लभन्त इति व्यज्यते विध्वस्तविश्वाजनेत्यत्र जनमेव विश्वस्य जडता
नेनाशयस्यहमपि विश्वास्मि त्वेवास्म्यतो मेन कापि चिंतेति भावः वागीश्वरीत्यत्रायं भावः वाचः सरस्व
त्याः ईश्वरी रामरासस्यास्या सरस्वती मया प्रार्थिता सतो मम मुखे स्थित्वा रामरासवर्णानि चिकीर्षुं मामत्र वर्णने
कारयतिति रामरासे सरस्वत्याः स्थितिरुक्ता सदर्शने संहिता योजयाहि वाणीनिस्य सरवीषूहादीनां पाणिः

॥ ५ ॥

आरसतान प्रदत्वाञ्छ्रंसस्तौति जयतीति रहविश्वनाथस्य मम ग्रंतरे हृदये गीतकारे गीतं संगीत रघुनंदनं नाम काव्यरूपं तत्करणशीलः प्रियाशुक्तः प्रियः अर्थात्सर्वेषां नदासः अदासः स्वामी इतिपक्षेन श्रीशिवशंभुसावदासस्वेति कर्मधारयः श्रीप्रियादासनामा गुरुरूपरघुवरः रघुश्रेष्ठः श्रीरामचंद्रः जयतीति सर्वोत्कर्षेण वर्तते अर्थात्रिजोत्कर्षप्रकटयतीति सच्चिदानंदघनावरदेषु वराः श्रेष्ठाः सर्वगुणशालिनी समकलकल्याणगुणशोभिना शृंगाररसः प्रियतामुक्तिरूपस्तस्य पालिनी सखी स्मिन्नवचरणेनप्राणयत्रवारकरणेन च पालनशीला एवंभूता मूर्तिर्यस्य सः सर्वजनवत्सलः सर्वेषु जनेषु वत्सलः श्रीनिशुक्तः सर्वदासर्वेजनाः वत्सलाः श्रीतिशुक्ताय स्मिन्सः समदर्शीत्यर्थः प्रविगलितमत्सरः कर्षेणविगलितो मत्सरः परोत्कर्षासहनं यस्य सः प्रेम्णः पाथोधिः समुद्रः अर्थवा प्रेमाः पाथोधिर्यस्मात्सः यत्संगाज्जनः प्रेमसमुद्रो भवतीत्यर्थः गुरुघार्थानां धर्मार्थकाममोक्षाणां पूर्तिर्यस्मात्सः तेषां दातेत्यर्थः प्रविगलितमत्सरश्चासौ गुरुघार्थपूर्तिश्चेति कर्मधारः

जयतिसच्चिदानंदघनवरदवरसर्वगुणशालिशृंगाररसपालिमूर्ति सर्वजनवत्सलप्रविगलितमत्सरप्रेमपाथोधिगुरुघार्थपूर्तिः सर्वगतसर्वमतसर्ववंदितचरणसर्वशरणागतोहृतिविहारी गुरुरूपरघुवरः श्रीप्रियादासरहृविश्वनाथांतरेगीतकारी ५

यः सर्वगतः सर्वव्यापी सर्वमतः सर्वेषां संमतः सर्वैर्वंदिते चरणौ यस्य सः सर्वैयेशरणागतास्तेषां हृद्येविहरणशीलः सर्वगतेत्यादि चतुर्णां विशेषणानां कर्मधारयः वरदवरेत्यस्याप्यमर्थः अन्येवरदातारः सेवागतोवरंददाति अयंतु स्वयमेव नतत्रागत्वावरं ददातीति एतेन न तस्यातिसौलभ्यमुच्यते तेन च दयालुतातिशय इति एव भक्तिवतां रक्षत्वानन्याश्च कृतार्थान करोदितिकयालोकप्रसिद्धे व सर्वजनवत्सलेति विशेषणेन एषु कृते प्यपकारे उपकारमेव करोतीति निव्यज्यते तेन वास्यवैषम्याभावश्च प्रविगलितमत्सर इति विशेषणेन एव विपत्तस्यापि दोषाननालोच्य प्रसन्नो भवतीति निव्यज्यते तेन च परगुणग्रहकत्वमिति प्रेमपाथोधीत्यनेन मेघायथा समुद्राज्जलमादायान्यत्रवर्षन्ति तथास्मात्प्रेमाणमादायान्ये

न्यते गुरुमार्थं श्रुतिरितिविशेषणेनपरापवर्गचयिताततो मम कायमपिगुरुसार्थं चततुष्टयता यकं करिष्यतीतिव्यज्यते तेन विषयिणामप्यश्रियत्वमिति सर्वगतेत्यादिना सर्वस्यांतरे ममैव शक्तिपादने मात्सर्यमस्तीति सर्वगतत्वादवगत्य सर्वतो विरोध परिहृत्य सर्वे मतं स्वीकरोतितेदेवतादाराफलंचददातिततएवकोपिकस्यापिवदनं करोततत्रशैष्यवमभवति उक्तंचभारते आकाशात्पतितं तोयं यथा गच्छति सागरं सर्वदेवनमस्कारः केशवं प्रतिगच्छतीति ततएवकोपिकमपिशरणं यातततत्रोदराणामसामर्थ्येन सेव्येवेतिव्यज्यते तदुक्तं कार्त्स्न्येकर

शिवहरिचरितसरोवरथंगयकमलरसमभृंग शरणंतवचरणंभजेध्यानादिततिग

णत्वंचस्वभावश्चेतनाद्युतिः यस्मसारादिमे संतिन संतियद्रुपेत्तयेति विभृंग ९ ॥

विश्वनाथेत्यादिनायस्यगीतेसएवमदनः प्रविश्यकरोत्यतोयथार्थं भविष्यतीतिव्यज्यते सर्वत्रगीतेप्रथमचरणाधवपदेनन कचिदधिकमात्रं कचिन्न्यूनमात्रं कचित्समात्रं सर्वाचार्यकृतोहृश्यतेऽतोत्रदंडके प्रथमपदे मात्राद्वयो पिकमहच्छम् ५ ग्रंथश्रीरामलीलापरमरलिकंस्वादिग्रहंश्रीशिवेस्तोति शिवेतिहरेश्वरितंरामायणादिरूपेतदेवसरोवरं

सेत॰ तत्रत्वंगणाधिपवक्रमलंतत्रयोरसः आस्वादविशेषस्तत्रभृंगभ्रमरसदृशश्रीरामचरितंत्वया
टी॰ गणाधिपरसास्वादनेतिनिगुणाध्यानायप्रार्थितेगिरेः कैलासस्यशृंगेशिखरंयेनएवंभूतहेशि
४ वशरणोरत्नकेनवचरणंभजे ध्यानेत्यादिविशेषणेनएकांतमास्थायश्रीरामचरितमेवसर्व
स्वेनात्वातदनुभवंकरोषीतिव्यंजितम् तेनाहमपिसंगीतरत्नानंदनंकरोमिहेशिवतदध्या
स्वादयेतिप्रार्थनाव्यज्यतेतेनचग्रंथस्यगुरुसमर्पणम् तेनचग्रंथस्यकविमनसिदत्वमिति
६ अथविघ्नविध्वंसायस्वप्रमेयप्रदगुरुएवंगणेशंवंदते गोविंदेति गोविंदस्येंद्रियप्रवर्त्तक

गोविंदगुरुगुणालीकृतिशर्मभवामालतीमाल भूतचंदिरगुणमंदिरलंबोदरता
वकंपदंवंदे ७

स्यश्रीरामचंद्रस्यगुरवोरामसंबंधि नोन्दस्यगीतादयोयेगुणास्तेषामालयः परं
परास्तासांयाकृतिः श्रवणालस्योयत्कर्मसुखंतेनभवानिजातानियान्यगुणितान्येवमालत्यः
मालतीपुष्पाणितासांमालायस्यतत्संबुद्धिः भूतश्चंदिरश्चंद्रोयेनतत्संबुद्धिः हेगुणानांमंदिरगु
णानिवासस्थानअतएवलंबोदरतावकंपदंवंदेइत्ययंभावः गोविंदगुरुगुणपरंपरयानंतःकर
णपूर्णोसुखात्मकमालतीमालाभिर्वत्तस्थलंपूर्णमस्ति चंद्रधारकत्वेनसकलकल्याणगुणा। ४

अयत्वेनचऐहीकपारलौकिकतापनिवर्तकस्त्वमसीति गोविंदेत्यादिविशेषणेनगणेशस्य
रामस्वर्णनश्रवणरसिकत्वंव्यंजितं तेनचतद्विषयकस्यममग्रंथस्यापिश्रवणंकुर्विति प्रार्थ
नेति ७ अथग्रंथविस्तरणेप्रतिजानीतेविंध्येति रिपवएवगजास्तेषांसिंहः जयसिंह
देवनामाराजसिंहः राजश्रेष्ठोविंध्येगिरौअस्मिन्अथवाविंध्येविंध्यगिरिसदृशेतमोगह
नेसंसारेरिपवः कामादयएवगजास्तेषांसिंहः सिंहसदृशः यमादिभीराजतेइतिराजा
नस्तपस्विनस्तेषुसिंहः श्रेष्ठोजयसिंहोस्तितस्यतनूजः पुत्रविश्वनाथसिंहदेवनानामास

विंध्येरिपुगजसिंहोजयसिंहोराजसिंहोस्ति नवेतेतस्यतनूजोयंग्रंथेसंगीतरघुनंद
नाख्यम् ८ चिरमननसमनुभूतश्रीसीतारामसपृक्तः ॥

स्यगीतोरघुनंदनोयस्मिन्सः संगीतरघुनंदनइतिआख्यानामयस्यतंग्रंथंआनुपूर्वीविशिष्ट
पदसंदर्भेनतनुतेविस्तारयति विस्तारोहिपूर्वसिद्धस्यैवभवत्यतस्तनुतइतिक्रियायास्यपूर्वसि
द्धत्वंव्यज्यते तेनचैतद्गीत्यारघुनंदनोरासंकरोतीतिव्यज्यते ८ अथग्रंथकर्तृकर्तृकाशीर्दा
नपूर्वकमनुबंधचतुष्टयंदर्शयति चिरमननेति अगस्त्यसंहिताशुकसंहितानुमत्संहिताशि
वसंहिताकोशलखंडब्रह्मरामायणादीनांश्रीमधुराचार्यकृतवाल्मीकीयरामायणसंदर्भ

सं॰त॰
टी॰
६

6

स्यचयस्त्विरमननंतेनसम्यगनुभूतोयः श्रीसीतारामायोगसत्तेनसंश्रकास्तद्दर्शनसंश्रक्तारा स्यर्थः ग्रंथग्रेयः रसिकजनानांसद्योहृदयानंदीसुचिरंवङ्कालभवतग्रत्राधिकारीरसिक कोपासकः विषयोरामः संबंधश्चप्रतिपाद्यपादकभावः प्रयोजनंप्रेमलक्षणाभक्तिः ४ तन्मदवतारकृतलीलावर्णयत्रवतारिणांस्तौति त्वयेति त्वयायसत्यहृतनाम्नेवोधंज्ञानंद दातीतित्वयवोधदः तत्संबुद्धिः हेत्वयवोधदमीनस्यस्त्रहृरूपंयस्यतत्संबुद्धिः हेमीनस्वरू पजगतांयईशास्तेषांयतेश्रीरघुवरवेदवितिस्योन्यालनकारीप्रलयपयोधेः सलिलेसंचरा

सद्योरसिकजनानांहृदयानंदीभवत्वयंसुचिरम् ४ त्वयवोधदवेदवितिपालन
कारी प्रलयपयोधिसलिलसंचारी श्रीरघुवरमीनस्वरूपजयजगदीशपते

णशीलस्त्वंजयतिजोत्कर्षंप्रकटय भक्तिज्ञानाभ्यांरहितायत्तमेवतेदयानदुद्धारंकरोषीति भावः त्वयवोधदेत्यादिनाध्कारणोपकारकत्वंव्यज्यते तेनयत्ताद्दृशायमह्यमपितेदेहीतिप्रा र्थनाव्यज्यते जयेत्यनेनयस्यतवचरितानिकथयितंशेषाधिकार्यसमर्थाः सततमेवमंदमतेर्मम हृदंवृजेस्थित्वानिजगुणावर्णनसमर्थंमांकुर्वितिव्यज्यते दर्शितप्रलुयोमीनरूपोभगवानस त्यव्रतनामानंराजानंमहीमय्यांनौ कायामारोप्यतांचनिजशृंगेबंधयित्वाप्रलयपयोधिसलि

जलधिमथनेति हेकमठस्वरूपश्रीरघुवरजलधिमथनेवज्ररवित्राये सुरासुरास्तेषांयाता
रत्नकः जलतलेयतिः श्रमोयोमेथनगोमेदराचलस्तस्यधातााधारणाकर्तात्वंजय अत्रेदंव्याख्या
ख्यम् हेभगवन्परमदयालुस्त्वंस्वभक्तानोद्विक्लेशस्वयमेगीकृत्यतत्कार्य्यंकरोषीति तेनचमा
मापिसंगीतरघुनंदनग्रंथविधानरूपकार्य्यंकुर्वीति २ रदेति गिरिशगिरौकैलासेचनानि
विशचासौवनानामेचानोयामालापंक्तिः सेवनवरदस्यदंतस्यशिखरेऽग्रभागेविशाविस्ती

जलधिमथनवज्रखिन्नसुरासुरयाता जलतलयातमेथनगधाता श्रीरघुवरकम
ठस्वरूपजय १ रदशिखरेधरणीतवलसतिविशाला गिरिशगिरविवचनचन
मालाश्रीरघुवरसूकररूपजय ३ नवभुजभीमभुजंगोत्तमवरदधारी कनकक
शिपुमेंडूकविदारी श्रीरघुवरन

णीधरणीलसतिशोभतेहेजगदीशपतेसूकररूपश्री
रघुवरस्त्वंजयः सूकररूपेणाहिरण्याक्षंहत्वाधरणाघृतेतिकथाप्रसिद्धैव अत्रेदंव्यंग्यंहेभ
गवस्त्वंहिसागरमग्नाउद्धृत्यनिजांगेशोभयस्यतस्त्वंमदादीनोद्धारसिकरोति तेनचसंसारसा
गरमग्नंमामप्युद्धृत्यनिजांगसंगिनंविधेहीति ३ नवभुजेति नरवापवरदादंतभक्तानुधर
तितच्छीलः नवभुजएवभीमोभयानकोभुजंगः कनककशिपुर्हिरण्यकशिपुनामादैत्यः

सं०त०
टी०

सएवमेद्रुकस्तस्यविदारीतेविदारितवान् हेजगदेशएतेनरहरिरूपन्दसिंहरूपश्रीरघुवरत्वंज
य एतेनजिह्वोः कालमेकाकीदरूपेमोरदेतिप्रार्थनाव्यज्यते तेनचतस्यकालकालत्वमिति
५ छलितःइतिइतिवलिमत्रच्छलयन्त्वयमेवछलितस्तस्यद्वारमवसिरत्वसि किंचपदप
यसाचरणाब्जलेनगंगारूपेणाभवस्यसंसारस्यभारमपनयसिहरीकरोषि पापिनएवभुवा
भारास्तेषांगंगादर्शनादिनापापानिह्रियंतेइतिभावः हेवामनरूपश्रीरघुवरत्वंजय अहंता
वांशशशांकिवीनस्त्वविषयकसख्यदास्यादिभावोचितंमोत्वमायायाछलयित्वावध्वाचकर्म

छलितोवच्छलयनवलिमवसिद्वारम् पदपयसापनयसिभवभारम् श्रीरघुवरवाम
नरूपजय ५

रज्जुभिरनेकयोनिपुनर्नयसिवलिंसकच्छलयितातन्द्वारमवसीतिश्रूयते
वकृशश्छलनेनममनेत्रद्वारतोनहरोमेवतिछलितरत्यादिवाकेनप्रार्थनाव्यज्यते तेनचतव
वियोगस्यातिदुःसहत्वम् वामसंचूर्षेइतिधातुःवामयतिपराभावयतिनिजभक्तवत्सलतयेतर
भक्तवत्सलानितिवामनःयतोऽपकर्तृगतत्वावलेःपरमोपकारंकृतवानिति एवंवोद्धव्यश्चवामनर
स्यमराभिधानाद्वामनशब्दस्यायमाशयः ईश्वरोऽपिलघुकार्यंकुर्वन्लघुरूपोभवति अथवाद्रुव
म् उद्गिरणोइतिधातुःवामसमुद्गारयतिवलिनाएष्वीमितिवामनपदेनानेकविषयवासनामम

८ मनमउद्धारयेतिप्रार्थनाव्यज्यते ५

सुखदेति सुखदं मोक्षप्रदं यत्सांख्यं तस्य रचनायां मतिचतुरा मुनिमूर्तिर्यस्य तत्संबुद्धिः देवहूतेः स्वेदरम
नोरथानां पूर्तिर्यस्मात्तत्संबुद्धिः हे जगदीशपते कपिलस्वरूप श्रीरघुवर त्वं जय सुखदेत्यत्राय भावः ना
स्तिकप्रवेशः स्यादग्निवेशप्रणीतसांख्याद्भक्तिमिश्रं कपिलप्रणीतं सांख्यं पृथगिति यत्रेदं व्यंग्यं हे मन
नशीलत्वमेव विचारय सर्वो लोको निजजननीमनोरथं पूरयत्यतो लोकसदृशएव त्वं जात इति तेन
च मम मनोरथमपि पूर्णं करिष्यतीति स्वरत्नमहद्गाद्रयेतिप्रार्थनाव्यज्यते १ धृताभ्यां हलमुशलाभ्यां निहतेः ख
लानां दुष्टानां निकुरुंबं समूहो येन सः तं भ्रमराणामनुजानां च कदंबं परिवारः यं प्रणमति सहे ज

सुखदसांख्यरचनातिचतुरमूर्ते देवहूतिसुमनोरथपूर्ते श्रीरघुवरकपिलरूपजय १ धृ
तहलमुशलनिहतखलवृन्दपनिकुरुंबम् प्रणमति यममरमनुजकदंबम् श्रीरघुवर हल
धररूपजय २ केलिकृतहलकरमुनिमानसकर्षी रासोल्लाससमुल्लासखवर्षी श्रीरघु

जगदीशपते हलधररूपश्रीरघुवरत्वं जय यत्रेदं व्यंग्यं हे भगवन् सपरिवारसुरनरप्रणतात्त्वत्तः रतो
टनकः कोऽपि न लभ्यते नानाविधाः खलेभ्यः कलियुगखलेभ्यो मां रक्षेति तेन च कलौ खलबाहुल्ये
न विजयप्रचाराद्दर्शकेति २ केलिकृतहलेति हे जगदीशपते कृष्णस्वरूप श्रीरघुवर केलीक्रीड
या कृतः हलस्य कौतुकस्य करः कर्ता सर्वासामनीनां मानसस्य कर्षणशीलः पुनश्च रासोल्लाससमुल्ला
सखवर्षणशीलस्त्वं जय मुनिमानसेत्यादिवाक्येन सर्वोपासनाभ्यो रासोपासनस्य परत्वं तेन च हे भ
गवन् ममापि मानसमन्यत आकृष्य निजरासएवासक्तं कुर्विति तेन च पवित्रयोगपरा सर्वा नेत्रजया

8

स्तुवदेतिस्तवदेमोत्रदेयत्सागत्नेतस्यरचनायमतिचनरामनिमूर्तिर्यस्यतत्संबुद्धिः देवहूतेः स्वं
दरमनोरथानांपूर्तिर्यस्मात्तत्संबुद्धिः हेजगदीशपतेकपिलस्वरूपश्रीरघुवरत्वंजय स्तवदेत्यत्रा
र्थेभावः नास्तिकवंशेस्यादथिवेशप्रणीतसांख्याद्भक्तिमिश्रकपिलप्रणीतसांख्यमुख्ययोगतियत्र
वेदेत्वंगयेहेमननशीलत्वमेवविचारयसर्वोलोकोपिनिजजननीमनोरथंपूरयत्यतोलोकसदृशएव
त्वंजातइति तेनचममनोरथमापूरयतीतिजेश्वरत्वमुद्भावयतिप्रार्थनामन्यते ९ भूजेति भूता
भ्योहलमुशलाभ्यांनिहतोप्रबलानांदपाणांनिकुरुंबसमूहोयेनसः तं यमरघोमनुजानांच

जनहिततपसिनिरतिमुपयासिमुधामा परतरनरनारायणनामा श्रीरघुवरतापसरूप
पजय ५ ॥

जनहितेतिशोभनंधामतेजोयस्यसः हे परतर यतिचेहनरइतिनारायणइति
चनामयस्यसः यद्वाऽयतिशयेनपरेनरनारायणइतिनामयस्यत्वंजनानांहिताय तपसिनि

रतिंउपयासिप्राप्नोषि यत्रनरनारायणइतिनामद्वयंपकावतारामिप्रायेण हेजगदीशप
तेतापसरूपश्रीरघुवरत्वंजय यत्रेदंत्वंगये जनहितायस्वयमेवतपःकरोषि यतःपरमद
यालुस्त्वमतोहेभगवन्तवतपः फलमहंतेमस्यमपिस्वभक्तिदेहीति तेनचस्यतपः
करणायसामर्थ्यमिति यद्वापतेरघुवरनाम्नः परमत्वमुच्यते ५

शापमकरोति हेजगदीशपतेवरंश्रेष्ठंहरिसंज्ञकंरूपंयस्यसः तत्संबुद्धिः हेरघुवरशापेन
मकरोयोहरेरिंद्रस्यगायनोगंधर्वस्तस्यस्मरणतोदीनाशरणागतस्यगजयूथस्यगजराज
स्यपानात्रक्षकस्त्वंजय अत्र ग्रंथेद्व्यर्थं हेभगवन्ननेकजन्मदुःखहरणनवनामगुणाकी
र्त्तनेर्ज्जर्वेतेमामनाथमकरः कृतोग्रसितवान्जन्मान्तरेकस्यचिच्छापाच्चेतमपितमेवनिवा
र्य्यो नाथमकरान्तरसोद्धरस्वेति नचस्वस्यानन्यशरणागतत्वमिति १० तत्रियेतित्रिया

शापमकरहरिगायनस्मरणतुतता शा॰ रणागतगजयूथपपाता श्रीरघुवरवर
हरिरूपजय १० तत्रियमेद्रविशेषितवरनरहारम् गिरिशगलगमयसिवकु
वानम् श्रीरघुवरमृगुवररूपजय ११

णाम्बेद्रे विशेषितः सचासौवरनरहारश्च सतंवहवारंगिरिशस्यशिवस्यगलंगगमयसि
श्रापयसिहेजगदीशपतेभृगुवररूपपरशुरामस्वरूपश्रीरघुवरत्वंजययेरणेमस्ववीभू
यत्रियेतेनच्छिन्नरोमालोमहादेवोधारयतीतिप्रसिद्धेः ग्रंथेद्व्यर्थंहेभवंस्वश्रीशिवस्यम
र्ध्यशिष्यः स्वद्वेसपवमंत्रेमत्वमपिदत्तवान् पश्चान्मयाश्रीहरिगुरुप्रियासमस्वाच्छा
नोऽ नः सतीर्थ्यतानामयापिसख्येकुर्वति नेनमामपिसमानशीलंकुर्वितिच ११

गीत· टी· ५

वितरसीति विबुधानां देवानां चयाय समूहाय चिरंतनं विनैनेन संचितं सुकृतमिव नवोदितं नवम्
यत्त्वं स्वस्वदातिशेषः अमृतं वितरसि दत्से हे जगदीशपते मोहिन्याख्यं मोहिनीनं रूपं यस्य तत्सं
बुद्धिः हे मोहिनीरूप श्रीरङ्गवर त्वं जय अत्रेदं व्यङ्ग्यं भक्तेभ्यो हरेर्ममत्वमस्तीति तेन च ममाप्यपि ममत्वं कृ
त्वा ममापि प्रेमामृतं पायय स्वेति ॥१॥ पशुहिंसेति पशुहिंसाविधिपरं यत्र प्रतिपादकं तं निगमं वेदमु
क्तितो बहूनां पापखेदनामधिगमः अस्मिन् कर्मणि तत्र यथा भवति तथा ऽवगणयसि निन्दसि हे
जगदीशपते बुद्धस्वरूप श्रीरङ्गवर त्वं जय अत्रायं भावः हे भगवन् भवान् स्वरमोहनापापखेदमल

वितरसि विबुधचयाय नवोदितमूनम् चिरवितनसंचितमिव सुकृतम् श्रीरङ्गवरमोहि
नरूप जय ॥१॥ पशुहिंसाविधिपरमेव गणयसि निगमम् प्रकटितवज्रपापखेदाधिगम
म् श्रीरङ्गवर बुद्धस्वरूप जय ॥२॥

प्रतिपाद्यत्वेदमपि पशुहिंसाप्रतिपादनं दर्शयि
त्वेव निन्दितवान् वेदार्थं तत्र प्रकटितवानिति तथा च मातामपुबलिप्रतिपादयतो देवानामपि
प्रपश्यप्रतिपादकाः इमे निमिः सह विवादे मध्ये राजा उपचरिचिरनामा पृष्टो देवाव घो
न ममराज्ये समस्तं कं करिष्यतीति विचारयन् देवानामेव यत्तरक्षितवानिति पंचरात्रीयाम
हाभारते मोक्षधर्मे मोक्षो ज्ञाप्रसिद्धा अत्रेदं व्यङ्ग्यं इदं कप्रवीणास्त्वममन्येषामप्यस्या
यस्व भक्तरक्षणं करोषीति तेन ममापि रक्षेति ॥३॥ ५

अघगणोति हेजगदीशपतेकल्किस्वरूपश्रीरघुवरअघगणानांपापसमूहानांभवनानियेय
वनाम्लेच्छास्तेषांनिधनदः मरणप्रदोवरःश्रेष्ठोबाहुर्यस्यस्यःकुलिरेवविधुस्तस्यकवलीकर
णोराहुःराहुसदृशस्त्वंजय अत्रकलियुगमनेनसत्ययुगप्रवर्त्तकत्वप्रतीयते अत्रेदंव्यंग्यं निजरा
ज्येकलिनाशयित्वासत्ययुगप्रवृत्तिंकुर्विति नेनचस्वचेतीभूयत्तवभजनंकुर्य्यामिति १४ ध
न्वंतरिरितिधन्वंतरिरितिनामत्वरितंदग्धंरोगनाशकमस्ति भवद्धरितेभवताकथितेभेषजमौ
षधंअशितेभक्षितेसतिशीघ्रंरोगंनाशयतीतिकिमुवक्तव्यम् हेजगदीशपतेवैद्यस्वरूपश्री
अघगणभवननिधनदवरबाहुःकलिविधुकवलीकरणराहु श्रीरघुवरकमल्कि
स्वरूपजय १४ धन्वंतरिरितिनामगदन्त्वरितम् भवद्धरितेकिमुभेषजमशितम्
श्रीरघुवरवैद्यस्वरूपजय १५ रुचिररुचीरुचितनयोऽस्मररिपुलोकम् स्तवय
सिशमितशोकस्तंभवशोकम् श्रीरघुवरयत्नस्वरूपजय १६
रघुवरत्वंजय अत्रेदंव्यंग्यं हेभगवद्गजनेमांरोगावकृव्याकुलयंतितद्यथाहमगदःस्यान्तथा
कुपांविधहीतितेनचभवत्कीर्तनमनारतंकुर्य्यामिति १५ रुचिररुचिरिति रुचिररुचिर्दीप्तिर्यस्य
सःरुचेःरुचिनामप्रजापतेस्तनयःअत्रस्मरअसमरारिपुलोकदेववलोकशमितःशान्तिनीतःसक
लयस्यभवस्यसंसारस्यशोकोयस्मिन्कर्माणिवद्यथाभवतितथास्तवयसिस्तुतिंकरोषि हेज
गदीशपतेयत्नस्वरूपश्रीरघुवरत्वंजय अत्रेदंव्यंग्यंसंसारशोकनाशनसमर्थस्त्वंसंसारगत

स्यममापिशोकं दूरीकुर्विति अनयाचप्रार्थनयासंसारतापभयव्याकुलतान्वय ते १९

सागरेति सागरेसमुद्रेसमरेयुद्धेदशास्वरस्यशंखवासुरस्यहृदयंविदारयतीतिसतत्संबुद्धिः वेदा
नुद्धरतीतितिसवनेजलेःसंचारीवासंचरतीतिसतत्संबुद्धिः हेजगदीशपतेहयगलरूपश्रीरङ्गवर
त्वंजय ग्रन्थेदं गम्यम् भवतोवेदस्यातिप्रियत्वमिति तेनचेहनीकलियुगलेरन्यथार्थकथनेनना
लोपितेवेदार्थमदंतः स्थितामन्मखवाय्याथास्थितार्थप्रकटयेति तेनचसंगीतरत्नुनंदनस्ययथा
स्थितवेदार्थसारत्वमिति १७ नगरेतिहेजगदीशपतेपृथुन्दपरूपश्रीरङ्गवर नगरेप्रसिद्धमू
लनगरेयस्मिन वङ्गग्रामालगंतितत ग्रादिपदेनपुरग्रामव्रजादीनांसंग्रहः तेषांवङ्गीरचना

समरदशास्वरहृदयविदारक वेदोद्धारकवनसंचरक श्रीरङ्गवर
हयगलरूपजय १७ नगरमूलनगरादिकवङ्गरचनोहे गिलित
वीजगोतनुगोदेही श्रीरङ्गवरपृथुन्दपरूपजय १८

तस्यांउद्दहस्तकार्यस्यसः गिलितंवीजंपयासागोसतनुर्यस्याः सासाचेतिकर्मधारयः
गिलितवीजगोतनुश्चासौगोश्चेतिमाताहशपृथिव्यादोहदोहनशीलस्त्वं जय ग्रन्थेदं
गम्यम् हेभगवन्ममार्पितराज्येकलियोगाद्वङ्कलमनुष्यादयपृथ्वयाः पृथ्व्याः प्रचरमन्नम
न्यादयेति तेनवराज्यशासनप्रवीणेनभवतेवङ्गदाराजमर्य्यादातादिदमपिराज्यसम
र्यादंविधेहीति तेनचाहमपिसचनीमूर्यप्रभवज्ञवितवर्णानेकरवाणीति १८ १०

परहितेति हे जगदीशपते ऋषभस्वरूप श्रीरघुवर परेषामन्येषां हिताय परमहंसानां पथिमा
र्गे विचरणशीलः भूसंचरणेऽपरिमिता लीला यस्य स त्वं जय अत्रेदं व्यंग्यम् हे भगवन्नानंद
रूपः परहितपरमहंसमार्गधार्यपरिमितलीलस्त्वं भवद्दत्तराज्यवास्तव्यानामखिललोकभी
तस्य भवच्चरणागतस्य ममापि परमहंसकरणारूपामेकलीलां कुर्विति तेन च संसारास्व
स्यैव वैराग्यवत्त्वेनेति तेन च संसारे क्लेशाधिक्यमिति १९ गुरुगणेनेति हे जगदीशपते दत्तस्व

परहितपरमहंसपथविचलशील भूसंचरणापरिमितलीलः श्रीरघुवर ऋषभस्व
रूप जय १९ गुरुगणानामिषविमुषितभुवनतोषः ध्रवधूतोजननुतपरोषः श्रीरघु
वर दत्तस्वरूप जय २०

रूप श्रीरघुवर गुरूणां गणानायाः मिषेणाच्छलेन विमुषितः हृतः
भुवनस्य संतोषो येन सः अपगतः शेषः क्रोधो यस्मात्सः जनैर्नुतः स्तुतोऽवधूतस्त्वं जय अ
त्रेदं व्यंग्यम् हे भगवंस्त्वं हि निजाचरणाख्यव्याजेन भुवनस्यासंतोषं हृत्वानेकगुरुकरणाच्छ
लेन स्वस्मिन्नेव तं रतिं नवानतो भुवनांतर्वर्तिनो ममाप्यन्यविषयकसंतोषं हृत्वा स्वपरिच
र्यायामेवासंतोषं विधेहीति तेन च भगवत्परिचर्याया ज्ञानादप्युत्कृष्टत्वमिति २०

प्रकटितेति हेजगदीशपतेनारदरूपश्रीरङ्कवरप्रकटितापरमाभक्तिर्येनचासौपृथिवीसु
खदायीचपृथिवीसुखदानशीलः कथंवेणायाहरेर्भक्तार्तिहारकमत्स्यादिनिजरूपस्यगुणा
नांगायीगानशीलस्त्वंजय अत्रेदंव्यंग्यम् मह्यमपिप्रेमलक्षणांभक्तिंदेहीति तेनचरासा
नुभावकथंथ्यकरणेकेवाव्यज्यते तेनचग्रंथस्यप्रेमसाध्यत्वमिति २१ पूर्वंमूषमोक्षज्ञानप्रा
र्थनेनतदनंतरंप्रेमभक्तेरिदानींज्ञानसहितप्रेमभक्तिंप्रार्थयन्नाह कृतकलनायेति तंकलौ

प्रकटितपरमभक्तिःपृथिवीसुखदायी कथवरवीणाहरिगुणगायी श्रीरङ्कवर
नारदरूपजय २१ कृतकलनाथकलावपिविभासिवेदम् कृतपुराणगुप्त
तभावविभेदम् श्रीरङ्कवरशुकपितृरूपजय २२

कलौकलियुगेपिकृतकलनायज्ञानांकलनायरचनायकृतेषुपुराणेषुप्तोभावस्याभि
प्रायस्यविभेदोयत्रकर्मणिनयथातथावेदविभजसि शुकस्यपितुःव्यासस्यरूप
यस्यतत्संबुद्धिः हेश्रीरङ्कवरत्वंजय अत्रज्ञानभक्तिसहितशुकजनकत्वेनव्यासस्यज्ञा
नभक्तिप्रदानसामर्थ्यंव्यज्यते तेनचमह्यमपितद्वयंदेहीति २२ ॥ ११

सारासारेति हेजगदीशपतेहेसस्वरूपश्रीरघुवरपरिनोहृतोदरीकृतोजलजनैःकमला
नैर्यस्यसनस्यन्नस्नणोः विवेकोयेनतसारासारयोर्विभुंजपृथककर्त्तारंपमेकंमुख्यमव
येतिजानंतितानिनश्तिशेषःसत्वंजय पतेनहेभगवनवस्त्राममनाचार्योभवतिनदस्ता
ननाशकत्वेनाचार्यस्याप्याचार्यस्त्वमितिव्यज्यते तेनचममाप्यस्तानेहरीकृत्यमहृदये
रघुनंदनरासवर्णानेशोधयित्वाप्रकटयेति २३ कृतेति कृतेति कृतैःसनकप्रादिये
तेर्नामभिःस्तानकसनंदनसनातनसनत्कुमाररूपैः निहतोनाशितोभवजालःसंसा

सारासारविभुजमवयंतिमेकम् परिहृतजलजनिजन्नुरविवेकम् श्रीरघुवरहे
सस्वरूपजय २४ कृतसनकादिकनामनिहतभवजालः भजननिबेधनवो

रजालोयेनसःभजनस्यनिवेधनस्त धविशालः श्रीरघुवरबालस्वरूपजय २५

दीतिप्रवर्तकःबोधेनज्ञानेनविशालःविशेषणशोभमानःइहशवालस्वरूपश्री
रघुवरत्वंजय भजननिवेधनेत्यनेनपूर्वंचतुर्विंशत्यवतारवर्णानरूपेनभवभजनं
मयायथायथेज्ञित्यमाणेनभवेन्नहिंत्वमेवस्वाप्रायकंविज्ञपायंबोधय भवतिचेन्म
त्सार्थितंसफलयेतिव्यज्यते तेनचभजनेकृतेपिस्वस्यस्वयंप्रामिशंकेति तेनचत्वयैवस

र्वकार्य्यमिति तेनचमत्वस्यपारंतेश्यामिति २५

ईशेति ईशाः प्रतिब्रह्माण्डब्रह्मविष्णुशिवास्तेषामप्यनयामहः मूर्त्योऽमितकोटिब्रह्मा
ण्डवलितो महाविराड्ह्यमितकोटिब्रह्माण्डवलितत्वे प्रमाणाम् ब्रह्माण्डासंख्यनायायो ददर्शी
ईमनायवतस्थूलतमः सोपिनाम्नादेवो महाविराट् प्रत्येकलोमकूपेषु विश्वानि निखिला
नि च तस्यापि तेषां संख्या चक्रुर्मोवक्तुं न हि तम इति ब्रह्मवैवर्त्ते जितस्य ईश्वरस्तत्कारणभूतेषु
णि ब्रह्म तत्प्रमाणं ततो विराडजायत विराजोऽपि पुरुषः इति पुरुषसूक्ते तस्मात्तत्प्रमाणरू
पात्पूर्णब्रह्मणः परः श्रेष्ठप्रकाशित् हे जगदीशपते हे राम वरविविधावताराणां विस्तारी सा

श्रीरघुवरबालस्वरूपजय ईशमहेश्वरपरसाकेतविहारी वरविविधा
वतारविस्तारी जनविश्वनाथहृदिशमजयजगदीशपते २५

केतविहारात्रयोध्याविहारी त्वं जनविश्वनाथहृदि जयति जोर्कप्रकटय ब्रह्मब्रह्माण्डा
स्ततत्प्रमाणरूपत्वे प्रमाणाय द्वेतब्रह्मयस्यतत्र भेति ब्रह्मोपनिषच्छ्रुतिः एकं चाप्यपरं
समस्तजगतां ज्योतिर्मयं कारणं प्रागते च विकारसूत्यं गुणानिर्गुणमरूपं च यमत्र ळक्षीरामप
दारविंदनखरप्रांतस्य तेजोऽमलेशान्तविदविरोवदंति परमं तत्त्वं परेनास्त्यत इति पार
महेश्वपरमसिद्धांतसंहितायाम् १ नखेंदुकिरणश्रेणीपूर्णब्रह्मैककारणं केचिद्वदंति

तस्यांशं ब्रह्मविद्रूपमव्ययम् तदंशांशं महाविष्णुं प्रवदंति मनीषिणः इति पद्मपुराणीय वृंदा
वनमाहात्म्येच गुह्याद्गुह्यतमम् हे भगवन्ननिर्वचनीयतयान्यैरकथनीयो निजरहस्य
लीलां मद्धृदये विद्यमानः स्वयमेव मक्षविन वर्णयेति तेन च तल्लीलाया अपि सर्वोत्कृष्ट
13 त्वमिति यथ विविधावतारविस्तारीति विशेषणेऽ उक्तानामपि नंदनंदननारायणादीना
मवतारी रघुनंदन इति भावः प्रमाणं चात्र पद्मपुराणस्य वाल्मीकीयरामायणस्य वचनं
यथाक्रमं वोच्यम् तथाहि पुरा महर्षयः सर्वे दंडकारण्यवासिनः दृष्ट्वा रामं हरिं तत्र भो
क्तुमैच्छन् सुविग्रहं ते सर्वे स्त्रीत्वमापन्नाः समुद्भूतास्तु गोकुले हरिं संप्राप्य कामेन ततो मु
क्ता भवार्णवादिति स्वयं नारायणो भूत्वा वैकुंठं याति राघव इति पुनरेवमयाहृष्टो
रामो रमयतां वरः विस्मरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने इति च तत्र सर्वे नित्याः शाश्व
तस्य देहास्तस्य परात्मन इति नैव प्रकृतिजाः क्वचिदिति पूर्णमदः पूर्णमिदमित्यादिश्रु
तिस्मृतिभ्यः मीनाद्यवतारा नारायणादयश्च सर्वे नित्याः पूर्णा एवातो विविधावतार
विस्तारीति पदस्य रघुनंदन एव मीनाद्यवतारो भूत्वा तत्तत्कार्यं विधाय स्वस्मिंल्लीयंत

श्रुत्यर्थोभिप्रेतश्चेन्नर्हि मत्स्यादीनामष्टभुजानां चतुर्भुजानां द्विभुजानां वाभिन्नांशरूपाणाम
नित्यताप्रसंगः स्यात् ग्रन्थस्त्वेपकएवरामोभागवतैर्भावनानुगुणरूपोदृश्यतइतिश्चेन्नर्हितद्रू
पस्यकाल्पनिकत्वंस्यात् किंच विविधशक्तेनस्वचिन्तानोन्नस्तदुर्गाभैरवादीनांभिन्नांशानाम
पिवेदपुराणेतन्त्रेषुनित्यत्वंपरत्वंजगदुत्पत्तिस्थितिलयकर्तृत्वंचोक्तंतेषांदिकार्येविधायश्रीर
घुनंदनेलीनानांभवेयुस्तर्हितेषामनित्यतयावदादीनामपिमिथ्याकथनप्रसंगःस्यादितिचे
त्सत्यम् यतःसाकेतेश्रीरघुनाथएवमीनाद्यवताराणांनारायणादीनांचरूपेणस्वकीयेद्विभु
जेराजरूपेसेवते तएवतेऽभिन्नांशाः साकेतनिवासिश्रीरघुनंदनसेवकत्वेनाभिन्नांशाश्चस्त
दुर्गाभैरवादयोदेवतास्त्वपिनित्याः तस्मादस्यविविधावतारविस्तारीत्यत्रायमाशयः साके
तेश्रीरघुनंदनः स्वावरणगतानवताराणांनानात्तात्यकार्य्यकारयित्वापुनस्तदेवावरणप्रा
प्यैतेः सेवांकारयति अथवातएवावताराः श्रीरघुनाथाज्ञयास्वेनस्वेनांशेनतत्तद्ब्रह्माण्डग
त्वातत्तत्कार्य्यंविदधति तदुक्तंशिवसंहितायांहनुमंतंप्रत्यगस्त्यवचनम् श्रामीनंतमपो
ध्यायांसहस्रस्तंभमंडिते मंडपेरत्नसंतेचजानक्यासहराघवम् मत्स्याःकूर्मकिरिर्नें
कोनारसिंहोप्यनेकधावैकुण्ठोपिहयग्रीवोहरिःकेशववामनौ यज्ञोनारायणोधर्मपुत्रोनर १३

वरोपिच वासुदेवोपरोनंतः संकर्षणास्तरणपतिः प्रद्युम्नोप्यनिरुद्धश्च व्यूहाः सर्वेपि सर्वदारामेस
दायत्तिरामादेशव्यवस्थिताः पैतेरन्यैश्च संसेव्योरामोनाममहेश्वरः तेषामैश्वर्यदातृत्वादनन्त
लत्वात्रिरीश्वर इंद्रनामासइंद्राणांपतिः साक्षीगतिःप्रभुः विष्णुः स्वयंसविष्णूनांपतिर्वेदांतकृ
द्विभुः ब्रह्मासब्रह्मणांकर्ताप्रजापतिपतिर्गतिः रुद्राणांस्वपतीरुद्रोरुद्रकोटिनियामकः
15 चंद्रादित्यसहस्राणिरुद्रकोटिशतानिच अवतारसहस्राणिशक्तिकोटिशतानिच ब्रह्मको
टिसहस्राणिदुर्गाकोटिशतानिच महाभैरवकालादिकोटयर्बुदशतानिच
गंधर्वाणांसहस्राणिदेवकोटिशतानिच सभायस्य
निषेवंतेतंश्रीरामइतिरितिश्रुतिस्मृतिश्च
देवानांपूरयोध्यानन्तदृश
मयादिव्यरत्नकोशाढ्या
तस्यांनित्यमेवसीताराम
योविहारस्थलमस्तीति
अथर्वणउत्तरार्द्धे १५
॥

सेत॰
टी॰
१५
15

उक्तावतारगणमवतारिस्त्ववर्णीनमयसंहरतीति मीनाद्याइत्यादिना मीनाद्यास्तनूर्दधतेपोषयते
शेषंस्पष्टम् मीनाद्याद्यधेततनूरितिविशेषणेनावताराउक्ताः शेषैर्विशेषणैः कर्माण्युक्तानि
अत्रवर्तमानकालबोधकशब्दप्रयोगेणनामरूपलीलादीनांनित्यतोद्योजिता तेनचतेषामपि
तद्रूपत्वमिति १ अथावतारिणोश्रीरसिकनंदनेस्तौति ललितेति ललितायाअल्पः समस्तव्यस्ता
सायोगणाः समूहस्तेनमंडितः भूषितस्तस्मैतुह्यिः रसेशकृततवाच्छुंगारेपंडितस्तस्मैतुह्यिः चप

मीनाद्याद्यधेततनूर्दलयपेदैत्यान्स्तनोरत्नतेधर्मीनाचरतेस्तनेरचयतेऽधर्मनिराकु
र्वते भक्तान्भावयतेयशोजनयतेवाणान्यतुर्विभ्रतेसाकेतप्रमदावनेविहरतेरा
मायतुभ्यंनमः १

लाच नद्गलामनोहराचमणीनांमालायस्यतस्मैतुह्यिः पतेनरा
संकुर्वतोरचनंदनस्यपेस्तुतिरितिव्यज्यते तेनचकविमानसेऽन्यलीलाभ्योरासललीला
याः प्राधान्यम् ईहशेहेहरेभक्तानांरासानन्दभवरूपक्लेशनाशनेत्यर्थः हेरामरमते
सखोः स्मितिस्तिरामः पतेनानेककोटिसखीरमणशीलत्वंव्यज्यते तेनचतस्यदक्षिणनायक
त्वं अथवारमतेत्रजलांगनियत्रअनेककोटिशधारेत्यर्थः त्वंजयजयनिजोत्कर्षंप्रकटय जयज

१ [illegible] १५

न्तीति दिनेन्द्रपाणां मण्डलं समूहं मण्डयति भूषयतीति तत्सम्बुद्धिः खण्डलान् दुष्टान् खण्डयतीति तत् सम्बुद्धिः सम्यगुद्दण्डो धनुर्यस्य तत्सम्बुद्धिः दिनेन्द्रमण्डलमण्डनेत्यनेन हे भगवन् ममापि खल व्यतिरिक्तान्दपान्तर्गतत्वेन मण्डनं करिष्यस्येवेति तेन च मन्मुखोद्गतत्रय्यमण्डनं कुर्विति व्यज्यते समुद्दण्डकोदण्ड इत्यत्र रक्तनेदनस्य सदा रक्षोद्युक्तत्वे तेन च ममापि सर्वथा रक्षा विधीहीति प्रार्थना व्यज्यते २ हनेति हनोहूषणो दोषरूपो खरहूषणो खरहूषणानामानौ राक्षसौ येन

ललितगणमण्डितरसपण्डित हे चपलचटुलमणिमाल जय जय राम हरे १ दि
नेन्द्रमण्डनखण्डलखण्डन हे समुद्दण्डकोदण्ड जय जय राम हरे २ हनहूषणखरहू
षणभवभूषण हे दशमुखगजमृगराज जय जय ३

तत्सम्बुद्धिः भवस्य संसारस्य भू
षणमलंकारस्तत्सम्बुद्धिः दशमुखो रावणः स एव गजस्तत्र यो मृगराजः सिंहस्तत्सम्बुद्धिः हे दशास्यदेवाङ्गयम् यथा रावणं संवधितो हूषणादीन् हत्वा दिव्यरूपे दशाननं निज मेव को विहितस्तथा खरहूषणसहृशान्मम मनसो भ्रमादिदोषान्नाशयित्वा दशेन्द्रियाणि मुखानि निर्गमद्वाराणि भक्तिद्वाराणि वा यस्य तद्दिव्यरूपं विधाय निजरूपं सज्जं कुर्विति तेन च वक्रसाधनसम्पन्नो सन्यामपि भवद्रूपो विना मनसः शुद्धिर्न साधनं रति ३

सं॰ त॰
टी॰
१५

15

सकलेति सकलंयच्चराचरंस्थावरजंगमात्मकंजगत्तद्रोचयतिप्रकाशयतीतिसतत्संबुद्धिः अथ
वासकलस्यचराचरस्यरोचनमभिप्रेतिर्यस्मिन्हृतेशोचनेशोकोयेनतत्संबुद्धिः मुनीनांमननशी
लानांयत्कुलंसमूहस्तस्यकुशलस्यमुक्तिरूपस्यनिदानमाद्यकारणंईदृशात्रसकलेत्यादिपदे
नहेभगवन्सकलचराचरप्रकाशकस्यत्वतवमद्धृदयेज्ञानप्रकाशनमतिस्तकरोमितितेनचम
यास्वीयरहस्यवर्णनेकारयेतिव्यज्यते ४ सानानकेति सानानकेसाकेसानेयेजनास्तेषांवेद

सकलचराचररोचनहृतशोचनहे मुनिकुलकुशलनिदानजयजय ४ सानानक
जनवेदनरक्तनंदनहे कृतवरललितविलासजयजय ५ वरविलसितनखचंदि
रसुखमंदिरहे श्रीमुखकमलमिलिंदजयजय ६ ॥

नयाह्लादकयथाचंद्रनोमलयेस्वसमीपस्थान् हृत्तापंदनीकरोतितथात्वमपिसाकेतजनान्स्व
सदृशान्करोषीतिभावः हेरक्तनंदनकृतावरुवः ललितामनोहराविलासायेनतत्संबुद्धिः
अत्रप्रथमविशेषणद्वयेनयथाक्रमंशृंगारप्रकटलीलेव्यज्यते तेनचतयोरानंदरूपतेति चरमा
विशेषणेनचहेभग`` त्रिदंमत्कृतंकाव्यमपिललितविलासवद्विधेहीतिव्यज्यते ५ वरेति
वराः श्रेष्ठाः विलसिताः शोभितानखरूपिणश्चंद्रायस्यतत्संबुद्धिः नखचंद्राणां १९

वरत्वंचनिष्कलंकत्वेनज्ञातव्यम्स्वस्वरूपमंदिरमथवास्वस्वरूपंतदेवमंदिरमयोध्यारूपंनि
वासस्थानयस्यतत्त्वंबुद्धिः तत्रप्रमाणं अयोध्याचपरंब्रह्मेति श्रियोजानक्यामुखकमलेतत्र
मिलिंद अयंभावः यथामधुकरकमलंसेवतेतथाभवाननवरतावलोकनेनजानकीवदनमिति
श्रियःश्रीश्चभवेदग्र्येतिवाल्मीकीयरामायणोक्तेः श्रीपदंजानकीवाचकं अत्रप्रथमेनविष
णोनध्यानिनांहृदयोपकारनिवर्त्तकत्वंद्वितीयेनत्वन्निवासाहृदयस्यस्वस्वरूपत्वं तृतीयेनत

पदपद्मेशणानानवजितदानवहेपरमानंदस्वस्वरूप
जयजयरामहरे ७ ॥

स्यात्रकूलत्वंरसग्राहकत्वंच तेनचममकाव्यकुसुमस्यरसग्रहणोत्तिव्यज्यते पदपद्मेति
हेजितदानववनपदपद्मेशणानानस्मा भक्तानवरतपरमानंदवशोभनेरूपेयस्यरहशहे
रामजय अत्रप्रथमेनविशेषणेनरघुनंदनस्यत्रैलोक्यरक्षणसामर्थ्यम् तेनचहेभगवन्
नवचरितवर्णनेदानवसदृशान्विघ्नान्विनाशयमांरक्षेतिव्यज्यते द्वितीयेनममोक्तिमपि
परमानंदरूपांविधेहीतिव्यज्यते ७ ॥

स्तो. टी. १९

16

विश्वनाथेति विश्वनाथनामाचार्यो जनस्तव भक्तस्तस्य रक्षणेति निश्चनस्तत्संबुद्धिः अथवा
विश्वनाथाश्च ते जनाश्च ब्रह्मादयस्तेषां रक्षणे सविचक्षण समेसर्वे ये निगमा वेदास्ते `` `` शा
स्त्राणि तैर्गीत स्तत्संबुद्धिः अत्र सविचक्षणेत्यनेन रक्षणेऽनायासता व्यज्यते समेत्यादिना सक
लनिगमाविरुद्धमेव मन्त्ररविनकथयिष्यसीति तेन च श्रेयस्य सर्वादरणीयत्वं व्यज्यते ॥ इ
हाष्टपद्यां काव्यनायकस्य गुणाश्च प्रयुक्ताः नयाहिललिताली गणमंडितेति पदेन कामुकत्व
म् रसमंडितेति पदेन वैदग्ध्यम् हितनिन्दपेत्यादिपदेन महाभाग्यत्वमर्थत्वं च दशमुखेत्यादिप
देन तेजस्विता भवभूषणेति पदेन सौंदर्यम् इनशावनेति पदेन धार्मिकत्वम् रामेतिपदस्य

विश्वनाथजनरक्षणसविचक्षण हे समनिगमागमगीत जय जय राम हरे ८ अतिचंच
लकामिनीकटाक्षाकलनाकृतकलाकुलस्वरूपा परराम विलास भासिनो वोभिमते ॥ दाशरथेर्दधातु हे ॥

द्वितीयार्थेन पुरेचरता मुनिकुलेत्यादिना दारकतारकनंदनेति पदेन महा
कुलीनता निगमेत्यादिपदेन कीर्तिरिति ८ अतिचंचलेति परेरुत्कृष्टरामविषयकविलासे
भासिनः शोभमानस्य दाशरथेः श्रीरघुनंदनस्य दृष्टिः वः युष्माकम् अभिमतं दधातु कीदृशी दृष्टिः
अतिचंचला ये कामिनीनां कटाक्षास्तेषामाकलनाया स्वीकारेणाकृतकलया शृंगाररसीयचेष्टावि
शेषेण `` आकुलस्वरूपे यस्याः सा रघुनाथप्रकाशकत्वरामस्य परत्वे हेतुः अत्रातिचंचलेत्यादिना
रघुनंदनस्य सर्वोत्तमरामोत्कर्षो व्यज्यते तेन च पूर्णशृंगाररसोदय इति ५

१९

सि०द्वि० ४

इति श्रीमहाराजाधिराजश्रीमहाराजाबहादुररामचन्द्रकृपापात्राधिकारिविश्वनाथसिंह
देवकृतायामानंदरामायणेऽथ चेदिकाभिधायां संगीतरघुनंदनटीकायां प्रथमः सर्गः १ एवं मंगला
चरणं विधाय संगीतरघुनंदनकाव्ये प्रकटयन् सरयूतीरे भवनशस्यवर्णां विध्यनु संक्षेपतो भवन
वर्णनं करोति सरवदेत्यादिना सरवदः समीरो वायुर्यत्र तत् सरयूतीरे यल्ललितनिलयनं सुंदरम
वनं विलसति शोभते तन्मदनस्य कामस्य मदयमानं दर्पदं मन्ये कीदृशं तत् कांचनस्य सुवर्णस्य शा
लः प्राकारो यस्य तत् पुनः मणिमयानि जालानि गवाक्षा यत्र वा ची वरजालाकारविचित्ररचना

[illegible] इति श्रीमहाराजकुमारश्रीबाबूसाहेबविश्वनाथसिंहदेवकृते संगीतरघुनंदने मंगा [illegible]
लाचरणो नाम प्रथमः सर्गः १ सरवदसमीरसरयूतीरे विलसितललितनिलयमनम्
कांचनशालं मणिमयजालं मन्ये मदनमदयनम् १ चंदनचर्चितकुसुमसमर्चितमा
हीपरमरमणीयम् चंद्रस्तुतचंद्रकांतच
विशेषो यत्र तत् यत्र विलसतीति वर्तमान
क्रियया धाम्नो नित्यत्वम् तेन च रासलीलाया नित्यता व्यंजिता सरवद पदेन सीतलत्वं मंदत्वं सुगं
धित्वं च पवनस्य व्यंजितम् १ चंदनेति पुनः कीदृशं तत् चंदनेन चर्चिता लिप्ता या कुसुमैः सम्यग् वि
ताभूषिता या स्त्रीणां तिया वतस्य वासो मही च तया परमरमणीयं पुनश्च कीदृ चंद्रेण सुष्ठु बितः सचा
सौ चंद्रकांतमणीनां चयः समूहः तस्माच्चलितेन वहता सलिलेन कमनीयम् यत्र कुसुमसम

सं·त· टी· १२

17

चित्तप्रदेनतत्रकोमलास्तरणानैरपेक्ष्येव्यज्यते तेनचरामस्फूर्तियोग्यतेति चंद्रस्त्रुंविनेत्यादिपदे
नासकैर्नैरपेक्ष्यमास्तीर्णाकुसुमानामम्लानत्वंचव्यंजितम् १ मरकतेति पुनःकीदृशंमरकतस्यदृ
रिन्मणेर्यागोमुखनलिकागोमुखाकराणिजलयंत्राणितेभ्योनिर्गतस्यकुल्याकुलेपुकृत्रिमाल
त्यसरित्समूहेषुजलस्यलाभोयस्मिंस्तत्पुनःकीदृशंसुखसदनंसुखस्यनिवासस्थानंअथवा
सुखरूपमेवसदनंपुनःकीदृशंसरसीषुनत्रविहारार्थंनिर्मितेतरंगेषुकलितानिव्याप्तानिकम
लानितैर्ललिताशोभाशोभायस्यतत् कुल्याकुलेत्यादिनातत्रभवनेवाटिकाव्यज्यते तेनचतस्य

मरकतगोमुखनलिकानिर्गतकुल्याकुलजललाभम् सुखसदनंभ्रमकदनंसरसीकलि
तकमलललिताभम् २ यदधिकरतिरसपतिरपिकुरुतेपश्यन्नितशनिवासम् विश्वना॰
यनाथोपिसमीनस्तनुतेरासविलासं॰

नमस्तत्रृंगारोद्दीपनविभावाधिकरणत्वमिति २ यदि
ति रसपतिःशृंगारोपिमङ्गृहंपश्यन्नधिकारतिःप्रीतिर्यस्मिन्कर्मणितद्यथाभवतितथायत्रनिशनिवा
सेनिरंतरवासंकुरुतेविश्वनाथस्यमहादेवस्यममवानाथः श्रीरघुनंदनोपियद्गृहंपश्यन्सीतया
सहितःरासविलासंतनुतेविस्तारयति यदधिकेत्यादिनास्यशृंगारगदृहाप्याधिक्यम् तेनचानु १८
पमत्वंव्यज्यते विश्वनाथेत्यादिनाकदाचिदनिच्छोरपिश्रीरघुनंदनस्यरासकारणत्वंभवन २
स्यव्यज्यते तेनचास्यान्येभ्योपिरघुनाथगृहेभ्यप्राधिक्यमिति ४

गृहे इति तत्र गृहे रासक्रीडायां प्रणयिनि प्रीतिमति रमेशे श्रीरघुनंदने सहचरीभिः सखीभिः रमया
श्रीजानक्या च सह चिरं बहुकालं स्वैरं विहरति विहारं कुर्वति सति त्वं तस्य श्रममपनिनेषुस्यनेन
मिच्छुः वामावारान्सहि चिरं बहुकालं स्वैरं विहरति विहारं कुर्वति त वनितासमूहाद्वहिः ग
स्थितवनीकाचित्सखी आत्मसदृशीं श्रमितामपरां सखीमवदत् रमयेति पदेन रमेश इति पदेन
च विहारे संतोषाभावो व्यज्यते तेन च सामर्थ्यातिशय इति १ ईदृशानंदजनकरासतः श्रमो मा

गृहे तत्र स्वैरं सहचरीभिश्च रमया चिरं रासक्रीडाप्रणयिनि रमेशे विहरति सखी काचि
त्कुंजगृहमपनिनीषुः स्थितवनीवहिर्वामावारादवददपरामात्मसदृशीम् १ रासे
विलसति रसिकशिरोमणिरवलोकय मृगनयने रसपतिमंडितरोचेरखंडितरसप
तिः सरित्वानिःश्रमनिर्दोषकुंजरयंतीमत्नामपदि श्रमे मा न डितसुखवचपने १ ॥
निःसारये मदा सम्पूर्णा रासस्याद्र्दवंशो भां कथं पश्यामि इति श्रमसत्तितिं व्यंजयंती सखी वर्णमा
न रासमंगुलीनिर्देशेन वर्णयति रासः इत्याद्युक्तपद्यारासः इति हे मृगनयने त्वं विलोकय प
रसिकानां शिरोमणिः श्रीरघुनंदने रासे विलसति शोभते कीदृशी रसपतिना शृंगारेण मंडि
तः सचासौ रोविषादीस्यात्र खंडितस्य सः रसपेडितस्य श्रीरघुनंदनस्य अर्थे वा रसो त्वल
नवमंडितानां मर्यादानां निष्ठानां सुखवचने सुखसमूहो यस्मिन्सः रसपतिमंडितस्य

सं॰त॰ श्रीरघुनंदनस्य अग्र्यवारसौख्याननमंडितानामर्थाद्वल्लनिष्ठानां सखवधनं सखसमूहो यस्मिन्सः रसप
टी॰ तिमंडितनरोचिरखंडितश्रीसौरसपङ्क्तिसखवचयनश्रमः तस्मिन् रसपतीत्यादिपदद्वितीयविशोऽ
१८ यंभावः अनेकविधुवदनानां प्रकाशच्छटाभिर्मणीनां प्रकाशापिकमतिरसपंङ्क्तिनेत्यादिविशेष
णेनत्रल्लनिष्ठाअपित्रल्लानंदस्यकारासस्मरणानंदशान्नवंतीतिव्यत्यते तेनचरासस्यत्रल्लानंदाद
प्याधिकत्वम् अत्रकविनिबद्धवक्त्रवैशिष्ट्येनन्यपदप्रधानार्थशक्त्युवस्तुनावस्तुध्वनिः रासल
18 क्षणोभागवतसंदर्भेनृत्यैर्दहीनकैर्दिनामन्योन्याश्लकरश्रियाम् नर्तकीनांभवेद्रासोमंडलीभूयनर्त
नमितिस्कंदपुराणेकोशलखंडेच नासोमनोभानविरासहाभिस्तेनेहनेनभुविहर्षकारी श्रीर
गभेदोभुविरासनामारामेणातानामसामनोहरेण यत्रासरोमाभुविरंगभूतिः सरासनामाभुविके
कीरकेकिकोकिलकोलाहलक्षरत्तरुलललितविलासे कुरवककबकुलकेतकीकेरवकं
लिभेदइत्यति १ रासशोभायाअनिर्वचनीयत्वेपियथामतिवस्तुमात्रं दकदंबविकाशे २ ॥ ॥ २
कथयति कीरेति कीराश्चपालिताः शुकाः केकिनश्चनत्यामयूराः कोकिलाश्चतेतेषांकोलाहलो
यस्मिन् अथवातेषांकोलाहलइवकोलाहलोयस्मिंस्तस्मिन्क्षरत्तरुलस्यक्षरत्तघटकस्यल
लितविलासोयस्मिंस्तस्मिन्कुरवकाश्चबकुलाश्चकेतकाश्चकैरवाचकंदानिचकदंबाश्चते
षांविकाशः फलनेयस्मिंस्तस्मिन्पतेतरवोऽन्येषांचोपवनतरूणामुपलक्षकाः कीरादी
नांकोलाहलसदृशस्तत्रसखीनांमधुरगानवाद्यभूषणकोलाहलोभवति क्षरत्तरुलेत्यादि
विशेषणेनयत्रतंगयरागमालयतिसपवर्ल्लरुदतीतिव्यज्यते तेनचसखीनांगानेप्रावीण्यातिश १८

विलसितेति विशेषेणलसितानोविपुलकाशेभोवायासांविधुवदनानोवल्लभिर्मनोहरैर्विनो
दैः क्रीडाभिः विशेषेणविचित्रयासुखस्यभूतेनवारूपिणोचरित्राणियस्मिंतस्मिन्विहरासेचकित
मास्वर्थिनचनचचकोराणांचलस्यैवंद्रंचुंवतिअथादरेणपश्यतीत्यर्थः विलसितेत्यादिपदेवनत्र
कस्याश्चिदपिस्वपत्न्यानास्तीतिव्यंजितम् तेनवाप्यानंदशतितत्रानेकविधुवदनाविलोकय
चकितस्थचकोरशत्यर्थः चुंवतीतिपदेनहेमित्रभवताकलंकः साधुष्टनः सनधृतश्चेनहीहतव
परिचयः कथंस्यादितिव्यज्यते तेनचसखीवदनानांशुभ्रीचेद्राद्भाभातिशयइति ग्रंथकविति

विलसितविपुलपुलकविधुवदनावल्लभविचित्रे चकितचकोरचयाविहचंद्रचुंबति
चारुचरित्रे २ गायतिकाचनन्दयतिकाचनरमयतिकाचनरामम् कापिचनटयति
कापिचनटयतिकापिचपटयतिकामम् ४

वद्वैशेषोक्तिजन्यलतणमूलंकोर्थशक्त्युद्भवोवस्तुनावस्तुध्वनिः २ गायतीत्यादि का
पिचसावीरामंनटयतिकापिचसखीनटयति तेनन्दयविपिणीचेष्टाकारयति अयंभावः हे
प्रियनमरासक्रीडयांतवलाम्पनभवतितयाप्यलंतसंगेनृत्यनामिति कापिचकामंयथेच्छं
पटयतिइवीणायतीत्यर्थः शेषस्पष्टम् एतेनसर्वासांस्वाधीनपतिकात्वंव्यज्यते तेनचसर्वा
रयकंदेनस्यातिरसकत्वमिति ४

सं.त.
टी.
१९

19

जितेति जितोविधुर्येनतत्तच्चतदम्बुवरवदनंतत्तेनविकाशितंवदनंयस्याःसाकापिसखीन
र्त्तयंतीसतीकलानिधिदर्शनेनमुद्रितानिमुखानियेषांतानिकमलानिहसंतीवअकलिवि
चारितासखीभिरितिशेषः अत्रहसंतीवेत्युत्प्रेक्षयाहेकमलानियद्रीत्यायुष्मदीयानि भव
यसंबंधेपियेनरामचंद्रमुखचंद्रेणाजितोमुद्रितोलोभवतितेनरीत्याविकसितानामस्मदीयमु
खकमलानांसमनेकत्वमुख्याकर्हाथैवेतितस्याभिप्रायोव्यज्यते तेनचसखीनांचातुर्यंगति
शयइतिअत्रवाच्यवैशिष्ट्यजन्यः प्रदप्रधानोऽर्थशक्त्युद्भवउत्प्रेक्षालंकारेणवस्तुध्वनिः ५

जितविधुरम्बुवरवदनविकाशितवदनाकापिनटती अकलिकलानिधिदर्शनमुख
कमलानिहसंती ५ रमणीमंडलमिहकुंडलितंनृत्यतिगतिसंगीतम् गायतिसर
तिससीतयासाकंश्रीरामोरसगीतम् ६ रमणीमंडलमिति इहरासेकुंडलितंह
स्तेनहस्तंगृहीत्वाकुंडलवदाचरितंरमणीमंडलंगत्यासंगीतेनृत्यतिश्रीरामःसीत
यासाकंसरेतिसप्रीतियथाभवतितथारसस्यशृंगाररसानुभावकंगीतमित्यर्थः गा
यति अत्रसीतयासाकमितिवाक्येनरक्तनेदनेनसह विहरंतीरत्यासखीरालक्ष्यापि
श्रीजानक्यामत्सराभावोव्यज्यते तेनचतस्याउत्तमस्वकीयात्वमिति ६ ॥ १९
६ ॥

अथ श्रीरघुनंदनं विशिनष्टि मलयजलेपितेत्यादिना मलयजेन लेपितं ललितं सुंदरं कलेवरं दे
हो यस्य सः सचासौ सचसः सचासौ वनमाली चेति विशेषणत्रयस्य कर्मधारयः वेणुधारण
मुक्तं लघुकौशलरवेंदे आजन्हावसमीतेशः सर्वास्ताज्जगदीश्वरः गानेन वेणुनासाकं सर्वं वि
मोपहारिणीति पुनश्च कीदृशः चलंतीयाग्रलंकानां तृणांकुतलानामालिपंक्तिः तस्याविलो
कनेन पुलकितो रोमांचितो यश्चालीनां सखीनां गणः समूहस्तेन शालीशोभितः मलयजलेपि
तेति पदेन ग्रीष्मकालिकरासे व्यंजितः तेन च मासमासि रासो भवतीति उक्तंचपट्ट हन्कोशलरव

मलयजलेपितललितकलेवरवलितवेणुमनमाली चलदलकालिविलोकितस
कलालीगणशाली ७ वीणामिलितवेणुरतितनकृतिरघुवरगीतस्ववर्णे विश्व
नाथरतिवदतिकामिनीमुग्धतितिनिपततिकर्णे ८

उद्देहेमंतः शिशिरः शिरश्च तितरागमस्य नित्याः प्रियाः सीतायाश्च वसंतश्चात्मविभवैः प्राहुति
नद्दायोपि च हेमंतादिषु सभवंति विविधा रासा श्रीरामप्रियाः सीतायाः कुसुमाकरादिषु व
तेस्वेच्छानिवधाग्रपीति अत्र चलदलकालीत्यादिपदेन कस्याश्चित् प्रियायाः स्मर
णाव्यंजितम् तेन च तस्या तिसामर्थ्यमिति ७ वीणेति वीणास्त्रमिलितवेणुराणन
शब्दः कृतयश्च संगीतशास्त्रप्रसिद्धायस्मिन् सचासौ रघुवरगीतस्य स्ववर्णः शोभनोऽ

संत·
टी·
१०
४०

